**अनिराकरण** न निराकरणमभावार्थे न०त० । निवारणाभावे "अनिराकरणात् कर्तुस्त्यागाङ्गकर्मचोदितमिति" हरिः ।

**अनिरुक्त** त्रि० निष्क्रान्तं उक्तमवयवार्थं निर्वृत्तमुक्तमवयवार्थो येन वा निरुक्तं निर्वचनम् न०त० । विशेषरूपेण निर्वचनशून्ये "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते" इति ऐत० । निर्वचनञ्च निरुक्ते यास्केन दर्शितं यथा "अथ निर्वचनम् तद्येषु पदेषु स्वरसंस्कारौ समर्थौ, प्रादेशिकेन गुणेनान्वितौ स्यातां, तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात् नत्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विषयवत्यो हि वृत्तयो भवन्ति । यथार्थं विभक्तीः संनमयेत्प्रत्तमवत्तमिति धात्वादी एव शिष्येते । अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीति, अथाप्यन्तलोपो भवति गत्वा गतमिति, अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति, अथाप्युपधाविकारो भवति राजा दण्डीति, अथापि वर्णलोपो भवति तत्त्वा यामीति अथापि द्विवर्णलोपः तृच इति, अथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाट्य इति अथाप्याद्यन्तविपर्ययो भवति स्तोको रज्जुः सिकतास्तर्कु इति अथाप्यन्तव्यापत्तिर्भवति" इति ॥ तथा प्रकृतिप्रत्ययानपेक्षयैव समुदायेन विशिष्टार्थबोधकमपि निरुक्तं यथोक्तम् ऋ० भा० माधवेन यथा "प्रकृतिप्रत्ययार्थमनपेक्ष्य विशिष्टैकार्थबोधकं पदं निरुक्तमिति" । अनिर्दिष्टे "अनिरुक्तप्रातःसवनः प्रथम" इति कात्या० २२,५,७, "अनिरुक्तं प्रातःसवनं यस्यासौ प्रथम" इति तद्व्याख्या ।

**अनिरुद्ध** पु० न केनापि युद्धेन निरुद्धः नि+रुध—क्त न०त० । कामदेवपुत्रे, उषापतौ, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहस्य परमेश्वरस्य कथमप्यनिषेध्यस्य अत्यन्तचलस्य चेतसोऽधिष्ठातरि अनिरुद्धाख्ये अंशे च अनिरुद्धः सुरानन्द" इति विष्णु० सं० । "न केनापि प्रादुर्भावेषु निरुध्यते" इति भा० 'अनिरुद्धोऽप्रतिरथ" इति विष्णुसह०। "चतुर्षु व्यूहेष्वनिरुद्ध" इति भा० "संकर्षणोवासुदेवः प्रद्युम्नश्चानिरुद्धकः । व्यूहश्चतुर्विधो ज्ञेयः सूक्ष्मं सम्पूर्णषड्गुणमिति" रामा० दर्श० । विवरणं रामानुजशब्दे वक्ष्यते । अप्रतिरुद्धे त्रि० ।

**अनिरुद्धपथ** न० न निरुद्धः पन्था यत्र ब० । आकाशे तत्र हि कस्यापि गतिरोधनाभावः । रुद्धवर्त्मभिन्ने त्रि० ।

**अनिरुद्धभाविनी** स्त्री ६त० । उषायां वाणकन्यायां तस्यास्तत्पत्नीभवनकथा च उषापतिशब्दे दृश्या ।

**अनिर्ज्ञात** त्रि० न निर्ज्ञातः निश्चितो प्राप्तो वा । अप्राप्ते, अनिश्चिते च "क्रिया हि अनिर्ज्ञातकालादिक्रियायाः परिच्छेदकत्वात् लक्षणं भवतीति" प्रौ० मनो० । अनिर्ज्ञातप्राप्त्यर्थं प्रतीक्षणं प्रतीक्षेति कठ०उ०भा० । प्राप्तं हि यथा स्वरूपं ज्ञातुं शक्यते नाप्राप्तमित्यतोऽप्राप्तस्यानिर्ज्ञातत्वम् । [धारणाभावे ।

**अनिर्णय** न निर्णयः अभावे न०त० । निश्चयाभावे अव-

**अनिर्दश** त्रि० न निर्गतानि दश दिनानि यस्य डच्समा० । अनपगतदशाहे । "उग्रान्नं सूतिकान्नञ्च पर्य्याचान्तमनिर्दशमिति" अनिर्दशञ्च प्रेतान्नमिति, "तावत् स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशमिति" "विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशमिति" "अनिर्दशायाः गोःक्षीरमौष्ट्रमैकशफं तथेति च" मनुः । अनिर्दशाहमप्यत्र त्रि० । "अनिर्दशाहां गां सूतामिति" मनुः ।

**अनिर्देश्य** त्रि० न निर्देश्यं जातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यम् निर्+दिश्—शक्यार्थे ण्यत् न०त० । निर्विशेषे निर्धर्मके परमात्मनि तस्य जातिगुणाद्यभावेन "इदं तदिति" निर्देशायोग्यत्वात्तत्त्वम् । "यत्तत् सूक्ष्ममनिर्देश्यमिति" श्रुतिः । "ब्रह्मन् ! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तय" इति भाग० १०म स्तुत्य० । अनिर्देश्यवपुः श्रीमानिति विष्णुस० । "इदं तदिति निर्देष्टुं यन्न शक्यते परस्मै, स्वयं वेद्यत्वादिति" भाष्यम् । [श्चिते ।

**अनिर्द्धारित** त्रि० न निर्द्धारितः । अवधारितभिन्ने अनि-

**अनिर्माल्या** स्त्री निर्—मल—ण्यत् न०त० । पृक्कानामकौषधौ शब्दरत्ना० ।

**अनिर्वचनीय** पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनम् । एवंरूपतया निर्वक्तुमशक्ये परमात्मनि । सत्त्वासत्त्वाभ्यामेकतररूपेण निर्वक्तुमशक्ये वेदान्तिमते जगति, अज्ञाने च न० । "अज्ञानञ्च सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति" वे०सा० ।

**अनिर्वचनीयसर्वस्व** न० अनिर्वचनीयं सर्वस्वं यस्य । श्रीहर्षप्रणीते खण्डनखण्डखाद्यापरपर्य्याये ग्रन्थभेदे तत्र हि सर्वेषां पदार्थानामिदन्तया निर्वक्तुमशक्यता व्यवस्थिता ।

**अनिर्वृति** स्त्री न निर्वृतिः स्वाच्छन्द्यमभावार्थे न०त० । स्वाच्छन्द्याभावे तद्रूपोपलक्षिते दारिद्र्ये च "अनिर्वृति-